शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

## अलङ्कार विवेचनम्

उत्प्रेक्षाऽलङ्कारस्य सोदाहरणं विवेचनम् ।

उपमेयस्य उपमानात्मना सम्भावना उत्प्रेक्षा । उपमेयस्य उपमान तादात्म्य सम्भावनम् उत्प्रेक्षाऽलङ्कारः । सा प्रथमं द्विविधा भवति — वाच्या प्रतीयमाना चेति । इवादीनां प्रयोगे वाच्या, तदभावे (इवादीनामप्रयोगे) प्रतीयमाना भवति । प्रतीयमाना एव गूढेति नामान्तरम् । उक्तञ्च साहित्य दर्पणे —

'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ॥
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः ॥' इति

द्विविधाऽपि सा प्रत्येकं वस्तुहेतुफलरूपत्वेन पुनस्त्रिविधा ।

तत्र वाच्याया भेदत्रयस्यैकमेवोदाहरणं यथा —

'त्वन्मुख श्रीकृते नूनं पद्मैर्वैरायते शशी ।'

अत्र प्रथमतः 'पद्मैर्वैरायते शशी' इत्यंशे वस्तुतः पद्मावैरिणी शशिनि पद्म वैरित्व सम्भावनात् वस्तूत्प्रेक्षा, एवं स्वाभाविके पद्म चन्द्र विरोधे कान्तामुख श्री प्राप्ति हेतुकत्व सम्भावनात् हेतूत्प्रेक्षा, चन्द्र पद्म विरोधस्य अफले कान्तामुख श्रीलाभे तत्फलकत्व सम्भावनात् फलोत्प्रेक्षा चेति ।

त्रिविधा प्रतीयमानोत्प्रेक्षा (गूढोत्प्रेक्षा) यथा —

'यत्कीर्तिर्विभ्रमभ्रान्ता विवेश स्वर्गनिम्नगाम् ।'

वस्तुतः स्वर्गनिम्नगाऽनवगाहिकायां कीर्तौ स्वर्गनिम्नगावगाह कर्तृत्व सम्भावनाद् वस्तूत्प्रेक्षा, स्वर्गनिम्नगावगाहस्याफल हेतुभूते 'विभ्रमभ्रान्तत्वे' तद्धेतुत्व सम्भावनात् हेतूत्प्रेक्षा, विभ्रमभ्रान्तत्वस्य अफल भूते स्वर्गनिम्नगावगाहे तत्फलत्व सम्भावनात् फलोत्प्रेक्षा चेति । सर्वा एवैता उत्प्रेक्षा व्यञ्जकेवादि प्रयोगाभावात् प्रतीयमाना उत्प्रेक्षा एवेति ।

उपेन्द्र झा
1/10/20
एसो॰ प्रो॰ साहित्य
रा॰ उ॰ सं॰ महा॰ वि॰
कुरसेला, पूर्णियाँ

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पणः षष्ठः परिच्छेदः

वृत्तीनां परिचयः

वृत्तः - वर्तन्ते (स्रोऽस्मिन्नेति) नायिकादि चेष्टा विशेषो वृत्तिः।
अभिनवगुप्तपादस्तु - वर्तन्तेऽनुप्रास भेदा आसु इति वृत्तयः।
ताश्च कौशिकी (कैशिकी), सात्वती, आरभटी, भारती चेति चतुर्धा भवन्ति। तत्र —

कैशिकी (कौशिकी) -
'या श्लक्ष्ण नेपथ्यविशेषचित्रा स्त्रीसङ्कुला पुष्कलनृत्यगीता।
कामोपभोगप्रभवोपचारा सा कैशिकी चारुविलासयुक्ता॥'
या मनोहर नायिकादि भूषणविशेषयुक्ता, नारी बहुला प्रचुरनृत्यगीता शृङ्गारादि निमित्तभूत व्यवहारा मनोरम शृङ्गार चेष्टा युक्ता शृङ्गार प्रतिपादिका वृत्तिः सा कैशिकी (कौशिकी) इति कथ्यते।
यथा शाकुन्तले राजानं प्रति शकुन्तला - अर्सनुद्ध्रो अणहि करिस्सदि।
राजा - इदम्। (इति व्यवसितः शकुन्तला कर्णे चौंकते।)'
सात्वती - 'सात्वती बहुला सत्वशौर्यत्यागदयार्जवैः।
सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा॥'
अर्थात् अत्यधिक शूरता दान दयार्जव उर्ष युक्ता स्वल्प शृङ्गारा शोकरहिता अद्भुतरसयुक्ता वीररसप्रतिपादिका च वृत्तिः सात्वती।
यथा - आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा,
वैतृष्ण्यं तु कुतोऽद्य सम्प्रति मम त्वद्दर्शने चक्षुषः।
त्वत्साङ्गत्य सुखस्य नास्मि विषयः किं वा बहुव्याहृतै-
रस्मिन् विश्रुत जामदग्न्य विजये बाहौ धनुर्जृम्भताम्॥'
अत्र रामस्य उत्तेजन कर वाक्यसाद्भुतापकः सात्वती भेदः। वीररसः।
आरभटी - 'मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादि चेष्टितैः।
संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता॥'
मायेन्द्र जाल युद्ध कोप अपरत्राण रहितमादि चेष्टाभिः हनन बन्धन प्रभृति व्यापारैः अतितौद्धत्योपेता वृत्तिरारभटी। अत्र रौद्रवीभत्स रस प्रतिपादिका वृत्तिरस्ति। यथोदाहरणे —
'जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभिः
र्भास्वन्तः सकला रवेरपि कराः कस्मादकस्मादमी।
एते चोग्रकबन्धकण्ठरुधिरैराध्मायमानोदरा,
मुञ्चन्त्याननकन्दरानलमुचस्तीव्रान् रवान् फेरवाः॥'
अत्र परस्पर विरुद्धालौकिक तिमिर रवि किरणादि प्रदर्शन एवं इन्द्रजालादीनां वस्तूनां मायया स्थापितम्। अत्र रौद्रो रसः।
भारती - 'संस्कृत प्रायो भारती वाग्व्यापारो नराश्रयः॥'
संस्कृत बहुलः पुरुषविशेष प्रयोज्यो वाक्प्रधानो व्यापारो भारती वृत्तिः। भरतस्तु नाट्यशास्त्रे उक्तवान् —
'या वाक्य प्रधाना पुरुष प्रयोज्या स्त्रीवर्जिता। संस्कृत वाक्य युक्ता।
स्वनामधेयैर्भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः॥'
यथा - रत्नावल्याम् 'श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी,
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः॥'
अत्र सर्वेषां प्रशंसया प्रकृत नाटकाभिमुखे श्रोतॄणां प्रवर्तनात्मकत्वात् प्ररोचना नाम भारती भेदः इति

उपेन्द्र झा
1/10/20
धर्मार्थप्रो० साहित्य
रा० उ० म० संस्कृत वि०
दुलौली, उदेपा (?)

Oct 1,

## शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

ध्वनिकारोक्त काव्यलक्षणम् साहित्यदर्पणकार मत्या खण्डनम्।

---

'काव्यस्य आत्मा ध्वनिः' इति ध्वनिकारस्य (आनन्दवर्धनस्य) काव्य लक्षणम्। अत्र पृच्छ्यते — तत्किं वस्तु, अलंकार, रसादि लक्षणः त्रिरूपो ध्वनिः काव्यस्यात्मा उत रसादि रूप मात्रो वा? न आद्यः — प्रहेलिकादौ ('तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः॥')

इत्यत्र किञ्चिद् पूर्णोऽर्थे कुम्भस्य वस्तुनो ध्वन्यमानत्वेऽपि एव विकलतया अकाव्येऽपि काव्यत्व प्रसक्त्याऽति व्याप्तिः स्यात्। द्वितीयश्चेद् ओमिति ब्रूमः। ननु यदि रसादि रूप मात्रो ध्वनिः काव्यस्यात्मा तदा —
'अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि।
मा पहिअ रत्तिअन्धिअ सेज्जाए मह णिमज्जहिसि॥'
इत्यादौ वस्तुमात्रस्य व्यङ्ग्यत्वे कथं काव्यव्यवहारः? इति चेत् न। अत्रापि आगन्तुके पर पुरुषे रत्यैव्यञ्जनात् श्रृंगाररसाभासं स्वेति न काव्यत्व हानिः। अन्यथा 'देवदत्तो ग्रामं याति' इति वाक्ये तद् भृत्यस्य तदनुसरणरूप व्यङ्ग्यः अवगतेरपि काव्यत्वं स्यात् अस्त्विति चेत् न। रसवत् एव काव्यत्व अङ्गीकारात्, न तु केवलं व्यङ्ग्यावगतिः काव्यत्व प्रयोजकेति।

रस एव काव्यस्यात्मा इत्यत्र अग्निपुराणमपि प्रमाणम् — 'वाग्वैदग्ध्य प्रधानेऽपि रस एवात्र जीवितम्' इति। व्यक्तिविवेककारेणाप्युक्तम् — 'काव्यस्यात्मनि सङ्गिनी रसादि रूपे न कस्यचिद् विमतिः।' इति।

ननु रसवत् एव काव्यत्वाङ्गीकारे प्रबन्धान्तर्वर्तिनां केषाञ्चित् नीरसानां पद्यानां काव्यत्वं न स्यात् इति चेत् न। रसवत् पद्यान्तर्गत नीरसपदानामिव पद्य रसेन प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारादिति।

यत्तु नीरसेषु अपि वाक्येषु गुणाभिव्यञ्जक वर्णसद्भावात् दोषाभावात् अलंकार सद्भावात् च काव्य व्यवहारः स रसादिमत् काव्यबन्ध साम्यात् गौण एव। यच्च वामनेन उक्तम् 'रीतिः आत्मा काव्यस्य' इति तन्न। रीतेः सङ्घटना विशेषत्वात् सङ्घटनायाश्च अवयव संस्थान रूपत्वात् आत्मनश्च तद्भिन्नत्वात्। यच्च ध्वनिकारेणोक्तम् — 'योऽर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः। वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥' इति अत्र वाच्यात्मत्वम् इति कथने 'काव्यस्यात्मा ध्वनिः' इति स्ववचन विरोधात् एव अपास्तम्।

वस्तुतस्तु नाऽनेन वाच्यात्मत्वं व्यवस्थाप्यते किन्तु काव्यस्य भेदमेव विभावितम्। तेन यः प्रतीयमानो भेदः स काव्यात्मत्वेन प्रसिद्धो ध्वनि रूप इति न स्ववचन विरोध इति बोध्यमेतदिति।

उपेन्द्र झा
सहा० प्रो० साहित्य
रा० आ० सं० महावि०
[illegible], [illegible]